| | |
|---|---|
| च्योसयितव्यम्, | चुच्योसयिषितव्यम्; |
| च्योसनीयम्, | चुच्योसयिषणीयम्; |
| च्योस्यम्, | चुच्योसयिष्यम्; |
| ईषच्च्योसः-दुश्च्योसः-सुच्योसः; | — |
| च्योस्यमानः, | चुच्योसयिष्यमाणः; |
| च्योसः, | चुच्योसयिषः; |
| च्योसयितुम्, | चुच्योसयिषितुम्; |
| च्योसना, | चुच्योसयिषा; |
| च्योसनम्, | चुच्योसयिषणम्; |
| च्योसयित्वा, | चुच्योसयिषित्वा; |
| प्रच्योस्य, | प्रचुच्योसयिष्य; |
| च्योसम् २, च्योसयित्वा २, } | चुच्योसयिषम् २ चुच्योसयिषित्वा २ }. |

(561) **"छजि कृच्छ्रजीवने"** (X-चुरादिः-1622. सक. सेट्. उभ.)

'क्षजि' इति धातुकाव्ये (3-24) पाठः।

इदित्करणात् णिचो वैकल्पिकत्वम्। छञ्जकः-ञ्जिका, चिच्छञ्जयिषकः-षिका, छञ्जकः-ञ्जिका, चिच्छञ्जिषकः-षिका, चाच्छञ्जकः-ञ्जिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचम्पयतिवत् (499) ज्ञेयानि।

(562) **"छद अपवारणे"** (X-चुरादिः-1834. सक. सेट्. उभ.)

आधृषीयः। [अ]

---

[अ] '**छदिरूर्जने**' (ग. सू.) इति भ्वादिषु पठ्यते। तत्र **छदि**रिति इका निर्देशः। **ऊर्जनम्**=बलनम् प्राणनं वा। चुरादिषु पठितस्य **छद**धातोराधृषीयत्वेन णिज्विकल्पनात् स्वार्थे णिजभावपक्षे मित्त्वार्थोऽयमनुवादः। धातूनामनेकार्थत्वादूर्जने वृत्तिः। छदन्तं प्रयुङ्क्ते **छदयति**=बलवन्तं प्राणवन्तं वा करोतीत्यर्थः। यदा तु **छादयती**ति स्वार्थे ण्यन्तः, तदा बलीभवति, प्राणीभवति, अपवारयतीति वाऽर्थः। तदा, 'नान्ये मितोऽहेतौ' (ग. सू. चुरादौ) इति वचनात् मित्त्वं न। '**छदिरर्जने**' इति कुत्रचिद् दृष्टः पाठो न साम्प्रदायिकः। '**छेद अपवारणे**' इति चुरादावेवोत्तरत्र विद्यमानस्य धातोरपि '**छद**' इत्येव **क्षीरस्वामि**सम्मतः पाठोऽप्यनार्ष इति ज्ञायते। **दैवपुरुषकारा**वप्यस्मदुक्तार्थोपष्टम्भकावेव। '**छादेर्घेऽद्व्युपसर्गस्य**' (6-4-96) इत्यादिसूत्राण्येवास्य धातोः भ्वादिषु पाठाभावे गमकानीत्यपि ज्ञेयम्।